# AMRITA VIDYALAYAM

## AMRITA PRE BOARD EXAMINATION 1 - 2018 - '19

**Class : X** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

| |
|---|
| निर्देशाः |
| अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति। |
| प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि। |
| प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया। |
| सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि। |
| खण्डः क - अपठितांश अवबोधनम् - 10 अङ्काः |
| खण्डः ख - रचनात्मककार्यम् - 15 अङ्काः |
| खण्डः ग - अनुप्रयुक्त व्याकरणम् - 25 अङ्काः |
| खण्डः घ - पठित अवबोधनम् - 30 अङ्काः |

## खण्डः क - अपठितांश अवबोधनम्

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

एकस्मिन् गृहे आसीत् एका वीणा। यदा कदा यः कोऽपि तत्र गच्छति स वीणां वादयति स्म। परन्तु वीणाशब्दः सम्यक् नास्फुरत्। तस्याः शब्दं श्रुत्वा सर्वे कर्णपीडाम् अनुभवन्ति स्म। कदाचित् क्रोधेन गृहमुख्यः तां वीणां बहिः निष्कास्य स्थापितवान्। एकः भिक्षुकः तां वीणां प्राप्य गृहस्य वरण्डे उपविश्य तां वीणां वादितवान्। वीणायाः मनोहरशब्देन जनाः तत्र एकत्रिताः अभवन्। परिवारसदस्याः अपि चकिताः अभवन्। यथेयं वीणा तथा जीवन-वीणा। तस्याः स्वरसंयोजनार्थम् अस्माभिः यत्नः कर्तव्यः। सत्कर्म-साधनं विना, रागद्वेषपरिहारं विना कौशलशिक्षणं विना च जीवनवीणास्वरः सर्वेषाम् आकर्षणे समर्थो न स्यात्। अतः सर्वैः मानवैः तदर्थमेव यत्नः विधेयः।

**I. एकपदेन उत्तरत।** **2**

क. एकस्मिन् गृहे का आसीत्?

ख. वीणायाः मनोहर शब्देन के एकत्रितः अभवन्?

ग. वीणायाः शब्देन सर्वे किम् अनुभवन्ति?

घ. वीणां गृहात् कः निष्कासितवान्?

**II. पूर्णवाक्येन उत्तरत।** **4**

क. अस्माभिः किमर्थं यत्नः कर्तव्यः?

ख. भिक्षुकः कुत्र उपविश्य वीणां वादितवान्?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

क. 'स्थापितवान्' इति क्रियापदस्य कर्तृपदं किम्?
(वीणा, सः, गृहमुख्यः, भिक्षुकः)

ख. 'तस्याः स्वरसंयोजनार्थम्' अत्र 'तस्याः' इति सर्वनामपदं कस्यै प्रयुक्तम्?
(सदस्यैः, वीणायै, सर्वैः, कर्णपीडायै)

ग. 'आकर्ण्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
(श्रुत्वा, उपविश्य, प्राप्य, निष्कास्य)

घ. 'स्वरः' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम्?
(कर्तव्यः, विधेयः, अभवन्, स्यात्)

**IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्डः ख – रचनात्मककार्यम्

**2. भवान् राघवः। प्लास्टिकस्य प्रयोगः पर्यावरण-नाशकः इति विषयम् अधिकृत्य मित्रं अंकुरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायाः उचितपदानि विचित्य पूरयित्वा पुनः लिखत।** **5**

मञ्जूषा
(कुर्मः, ज्ञातम्, मातृचरणेषु, नमः, राघवः, अंकुर, पर्यावरणस्य, रक्षणे, प्लास्टिकं, नवदिल्लीतः)

विश्वनीडः
क. ----------

प्रियमित्र ख. ---------।
सस्नेहं ग. ---------।

अत्र कुशलम् तत्रास्तु। ह्यः एव मम विद्यालये 'त्यज प्लास्टिकं रक्ष पर्यावरणम्' इति विषये एका गोष्ठी अभवत्। अत्रैव मया प्रथमवारं घ. -------- यत् प्लास्टिकस्य दूरगामिनः घातकाः च परिणामाः भवन्ति। अन्यानि सर्वाणि वस्तूनि मृत्तिकायां विनश्य विलीयन्ते परं ङ. -------- तु कदापि न अपक्षीयते। न इदं गलति न च विलीयते। एवं हि च. ---------- कृते महती क्षतिः भवति। परं वयं प्रातः जागरणात् आरभ्य रात्रौ निद्रापर्यन्तं प्लास्टिकस्य विविधवस्तूनां प्रयोगं छ. --------। किमधिकम् - इदं कलमं येन अहं लिखामि, अस्य च मसियष्टि उभे एव प्लास्टिक निर्मिते। कल्पयामि यदि एवमेव प्लास्टिकस्य प्रयोगः वर्धिष्यते तर्हि किं भविष्यति? वस्तुतः पर्यावरणस्य ज. ----- एव अस्माकं रक्षणम्। आशासे त्वमपि जागरूकः भूत्वा अन्येभ्यः अपि प्रेरणां प्रदास्यसि। गृहे झ. ---------- मम प्रणामाः।

भवदीयमित्रम्
ञ. ----------

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषाप्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत।** **10**

मञ्जूषा

(सैनिकाः, जनाः, जलाप्लावस्य, गृहाणि, विविधरीत्या, ग्रामः, नौका, भोजनसामग्री, मार्गाः, इतस्ततः, अवरुद्धाः)



## खण्डः ग – अनुप्रयुक्तव्याकरणम्

**4. अधोलिखित वाक्येषु रेखांकितपदेषु सन्धिच्छेदं सन्धिं वा कृत्वा लिखत।** **4**

क. येन सः विवेक इतीरितः।

(इति + ईरितः, इती + रितः, इति + इरितः, इति + रितः)

ख. पश्य पश्य रमणीयं भवनम्।

(भो + अनं, भव् + अनं, भो + वनं, भौ + अनम्)

ग. प्रिय + छात्राः अभिनन्दनं भवताम्।

(प्रियछात्राः, प्रियच्छात्राः, प्रियश्छात्राः, प्रियच्छत्राः)

घ. त्वं तस्य मनः + वृत्तिं न जानाति।

(मनोवृत्तिं, मनवृत्तिं, मनस्वृत्तिं, मनावृत्तिं)

**5. अधोलिखित वाक्येषु रेखांकितपदानां समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत।** **4**

क. को भेदः पिककाकयोः?

(पिकः च काकः च तयोः, पिकस्य च काकयोः, पिकः च काकः च, पिकौ च काकौ च तयोः)

ख. साश्रुनयनः यूथपतिः उक्तवान्।

(साश्रुनयनः यस्य सः, साश्रूणी नयने यस्य सः, साश्रूणि नयनं यस्य सः, साश्रुः च नयनं च यस्य सः)

ग. वयं श्रमं कृत्वा निर्विघ्नं जीवामः।
(विघ्न अभावः, विघ्नानाम् अभावः, विघ्नाः अभावः, विघ्ने अभावः)

घ. त्वं शक्तिम् अनतिक्रम्य परिश्रमं करोषि।
(यथाशक्ति, यथाशक्तिं, शक्तिं यथा, यथाशक्ती)

**6. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभजय वा उचितमुत्तरं विकल्पेभ्यः चित्वा लिखत। 4**

क. त्वया दूरदर्शने समाचाराः दृश् + तव्यत्।
(द्रष्टव्याः, द्रष्टव्यः, द्रष्टव्यम्, द्रष्टव्या)

ख. नृत्तं कृ + शतृ नर्तकाः गीतम् अपि गायन्ति।
(कुर्वन्, कुर्वन्ती, कुर्वन्तः, कुर्वत्)

ग. अस्माकं देशस्य भूगोल + ठक् स्थितिः को न जानाति?
(भौगोलिकी, भोगोलिकी, भूगोलिकी, भौगोलकी)

घ. एषा रमणीया सृष्टिः कलहेन दूषिता न कर्तव्या।
(दूषित + टाप्, दूषित + तल्, दूष + तल्, दूष + टाप्)

**7. अधोलिखित संवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा पूरयत। 3**

दिवाकरः - राहुल! अधुना त्वं कुत्र गच्छसि?
राहुलः - -------- मन्दिरं गम्यते।
(अहं, मया, त्वं, त्वया)
दिवाकरः - तत्र त्वं किं करोषि?
राहुलः - तत्र मया देवाः --------।
(नम्यते, नम्यन्ते, नमन्ते, नम्येते)
दिवाकरः - तर्हि त्वं तु भक्तः असि।
राहुलः - नहि नहि अहं तु सामान्य मनुष्यः --------।
(अस्ति, असि, अस्मि, भवति)

**8. भवतः विद्यालयस्य वार्षिकोत्सव कार्यक्रमः कतिवादने भविष्यतीति समयम् अङ्कानां स्थाने संस्कृतपदैः पूरयत। 2**

क. प्रातः (9:15) वादने सरस्वती वन्दना।
(सपादनव, सपादनवं, नवसपादं, सपादः नवं)

ख. प्रातः (9:30) वादने सांस्कृतिक कार्यक्रमाः।
(सार्धनव, सार्धः नव, सार्धं नवं, सार्धनवः)

ग. प्रातः (10:45) वादने प्रधानाचार्येण वार्षिकविवरणं प्रस्तूयिष्यते।
(पादोनदश, पादोनैकादश, सपादैकादश, दशोनैकादश)

घ. प्रातः (11:00) वदाने पुरस्कारवितरणम्।
(एकादश, ऐकादश, पादोन एकादश, सार्धैकादश)

**9. अधोलिखित वाक्येषु रिक्तस्थानानि प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा पूरयत।** **4**

क. मधुर संगीतस्य ध्वनिः --------- आगच्छति?
(अत्र, कुत्रः, किं, अधुना)

ख. त्वं ---------- पुरस्कारं प्राप्तुं समार्थः असि।
(इव, इति, एव, यत्)

ग. वृक्षाणाम् अभावे पशवः --------- भ्रमन्ति।
(कुत्र, इतस्तत, विना, इति)

घ. मम भ्राता -------- पठनाय विद्यालयं गच्छति।
(श्वः, ह्य, अधुना, इव)

**10. अधोनिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत।** **4**

क. माम् कुतुबमीनारः अतीव रोचते।
(मम, मह्यं, अहम्, वयम्)

ख. किं त्वं श्वः विद्यालयं आगच्छः?
(गच्छसि, गच्छ, गमिष्यसि, गच्छति)

ग. वाराणस्यां त्रयः विश्वविद्यालयानि सन्ति।
(विश्वविद्यालयाः, विश्वविद्यालयान्, विश्वविद्यलये, विश्वविद्यालयौ)

घ. ध्यानेन इयं कथां श्रृणु।
(इमम्, इमाम्, इदम्, अयम्)

## खण्डः घ - पठित अवबोधनम्

**11. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

**अ. गद्यांशः**

गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् - आर्य! किं सर्वगतं कुशलं वर्तते? अयथाकालं समागतोऽसि? सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत् - अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।

**I. एकपदेन उत्तरत।** **2**

क. प्रच्छन्नभाग्यस्य भार्या कीदृशी आसीत्?

ख. कासाम् तरणिः धैर्यम्?

**II. पूर्णवाक्येन उत्तरत।** **2**

प्रच्छन्न भाग्यः किमर्थम् अक्रन्दत्?

**III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** **2**

क. 'नौका' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत।
(धैर्यं, तरणिः, आपदाम्, चिन्तया)

ख. 'अपृच्छत्' इति क्रियापदस्य कर्तृपदं किम्?
(तस्य, भार्या, पतिं, गृहे)

ग. 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?
(प्रच्छन्नभाग्यः, प्रच्छन्नभाग्याय, दुष्टबुद्धिः, दुष्टबुद्धये)

घ. 'वृत्तान्तं' इति पदस्य विशेषणपदं किम्?
(सर्वम्, सकरुणं, सर्वगतं, उच्चैः)

**आ. पद्यम्**

"त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥"

**I. एकपदेन उत्तरत।** **2**

क. मूढपुरुषः कां वाणीं वदति?

ख. कीदृशीं वाणीं न त्यजेत्?

**II. पूर्णवाक्येन उत्तरत।** **2**

विमूढधीः पक्वं फलं त्यक्त्वा किं खादति?

**III. विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

क. 'बुद्धिहीनः' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(धर्मः, यः, विमूढधीः, धीः)

ख. 'धर्मप्रदां' इति पदस्य विशेष्यपदं किम्?
(त्यक्त्वा, वाचम्, फलम्, पक्वम्)

ग. 'परित्यज्य फलं पक्वम्' - अत्र विशेष्यपदं किम्?
(परित्यज्य, फलं, पक्वम्, नकोऽपि)

घ. 'परित्यज्य' इत्यस्य धातु प्रत्ययं च लिखत।
(परि + त्यज् + ल्यप्, परित्य + ल्यप्, त्यज् + ल्यप्, परित्यज्य + ल्यप्)

**इ. नाट्यांशः**

पर्यटनाधिकारी - 'मिथुनः' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।

शोभा - वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः।

पर्यटनाधिकारी - मया पूर्वम् एव उक्तं यत् अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः प्रबन्धः अपि अस्ति। अधुना तु वयम् अनेन प्रक्षेपकयन्त्रेण केषाञ्चित् स्थलानां परिचयं प्राप्स्यामः। पश्यत एतत् चित्रम्।

राजीवः - किम् एतत् कस्यचित् दुर्गस्य चित्रम्?

पर्यटनाधिकारी - आम्! एतत् दिवांग - उपत्यका मण्डले स्थितं भीष्मकनगरदुर्गम्। अस्य अवशेषाः तु आर्यकला संस्कृति सम्पदः परिचायकाः। अधुना इदं चित्रं पश्य।

**I. एकपदेन उत्तरत।** **2**

क. केषां दर्शनाय प्रबन्धः कृतः?

ख. विशिष्टः राजपशुः कः?

**II. पूर्णवाक्येन उत्तरत।** **2**

भीष्मकनगर दुर्गस्य अवशेषाः कीदृशाः सन्ति?

**III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** **2**

क. 'इच्छामः' इति क्रियापदस्य कर्तृपदं किम्?
(एकः, वयं, मया, एतत्)

ख. 'विशेषः' इति पदस्य विशेष्यपदं किम्?
(दर्शनाय, पूर्वम्, प्रबन्धः, चित्रम्)

ग. 'मया पूर्वम् एव उक्तम्' - अत्र मया पदं कस्मै प्रयुक्तम्?
(शोभायै, पर्यटनाधिकारिणे, राजीवाय, मिथुनाय)

घ. 'प्राक्' इति अर्थे अत्र किं प्रयुक्तम्?
(अधुना, एतत्, अस्य, पूर्वं)

**12. मञ्जूषातः समुचितं पदं चित्वा अधोलिखित श्लोकद्वयस्य अन्वयं पूरयत।** **4**

मञ्जूषा
(तपः, त्वं, अभ्यसनं, ज्ञानविज्ञाननाशनं, एव, इन्द्रियाणि, अनुद्वेगकरं, पाप्मानं)

अ. तस्मात्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञान नाशनम् ॥

अन्वयः
भरतर्षभ् तस्मात् क. --------- आदौ ख. --------- नियम्य ग. --------
एनम् घ. -------- हि प्रजहि।

आ. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

अन्वयः
यत् वाक्यं क. ---------- सत्यं प्रियहितं च तथा स्वाध्याय ख. ----------
च ग. ---------- वाङ्मयं घ. -------- उच्यते।

**13. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

क. अस्माभिः <u>गुरुजनोपदेशाः</u> अवधीरिताः।

ख. त्यागी <u>सर्वव्यसनविनाशे</u> दक्षः भवति।

ग. अहम् <u>भवते</u> चक्षुर्द्वयमेव ददामि।

घ. <u>मातरः</u> शिशून् कथयन्ति।

**14. रेखांकितपदानां प्रसङ्गानुसारं अर्थं चित्वा लिखत।** **4**

क. <u>आर्तानां</u> परित्राणाय एव मे निश्चयः।
(नराणां, मनुष्यानां, आगन्तुकानां, दुःखीनाम्)

ख. <u>अजेयः</u> स्यामिति विभो।
(अमर, अपराजितः, अजन्मा, अनन्तः)

ग. द्वादश <u>समाः</u> पर्जन्यः तद् राष्ट्रं न अभिवर्षति।
(मासाः, वर्षाणि, युगानि, दिनानि)

घ. सर्वः सर्वत्र <u>नन्दतु</u>।
(सीदतु, प्रसीदतु, करोतु, यच्छतु)